संस्कृत

स्तोत्र

२२६

ग्रं. नं. ७८

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

स्तो. ११६

प्रातः स्मरामि षसवधीति महाभिरं
श्रीनारायणं गरुडवाहनमब्जनाभं
ग्राहाभिभूतवरवारणमुक्तिहेतुं च
क्रायुधं तरुणवारिजपत्रनेत्रं ॥१॥ प्रा
तर्नमामि भजतामभयंकरं तं प्राग्देहज
न्मकृतपापभयापहत्यै ॥ यो ग्राहवक्त्र प
तितांघ्रिगजेंद्रघोरशोकप्रणाशनक
रो धृतशंखचक्रः ॥ प्रातर्नमामि म
नसा वचसा च मूर्ध्ना पादारविंदयुगलं
परमस्य पुंसः ॥ नारायणस्य नरकार्ण
वतारणस्य पारायणप्रवणविप्रपरा
यणस्य ॥२॥ श्लोकत्रयमिदं पुण्यं प्रा
तः प्रातः पठेन्नरः ॥ लोकत्रयगुरुस्त
स्मै दद्यादात्मपदं हरिः ॥४॥ ब्रह्मा मु
रारिस्त्रिपुरांतकारिर्भानुः शशी भूमि
सुतो बुधश्च ॥ गुरुश्च शुक्रः सह भा
नुजेन कुर्वंतु सर्वे मम सुप्रभातं ॥५॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai — A joint project

पृथ्वीसगंधासरसास्तथापः स्प
र्शीचवायुर्ज्वलितंचतेजः ॥नभः स
शब्दंमहतासहैवकुर्वंतुसर्वेममसु
प्रभातं ॥भृगुर्वसिष्ठःक्रतुरंगिराश्च
मनुःपुलस्त्यःपुलहश्चगौतमः ॥रै
भ्योमरीचिश्च्यवनश्चदक्षःकुर्वंतुस
र्वेममसुप्रभातं ॥७॥सनत्कुमारःस
नकःसनंदनःसनातनोप्यासुरिपिंग
लौच॥सप्तस्वराःसप्तरसातलानि
कुर्वंतुसर्वेममसुप्रभातं ॥८॥सप्तार्ण
वाःसप्तकुलाचलाश्चसप्तर्षयोद्वीपवना
निसप्त॥भूरादिकृत्वाभुवनानिसप्तकुर्वं
तुसर्वेममसुप्रभातं॥९॥इत्थंप्रभातेपर
मंपवित्रंपठेत्स्मरेद्वाशृणुयाच्चभक्त्या
॥दुःस्वप्ननाशस्त्विहसुप्रभातंभवे
च्चनित्यंभगवत्प्रसादात् ॥१०॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com